# pArshvanAthasahasranAmastotram

# પાર્શ્વનાથસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shrI Parshvanatha sahasranAmastotra

File name : pArshvanAthasahasranAmastotram.itx

Category : sahasranAma, deities_misc, jaina

Location : doc_deities_misc

Author : kalyANasAgarausUri

Latest update : August 23, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# પાર્શ્વનાથસહસ્રનામસ્તોત્રમ્

શ્રીકલ્યાણસાગરસૂરિકૃત
શ્રીસરસ્વત્યૈ નમઃ ॥

પાર્શ્વનાથો જિનઃ શ્રીમાન્ સ્યાદ્વાદી પાર્શ્વનાયકઃ ।
શિવતાતિર્જનત્રાતા દદ્યાન્મે સૌખ્યમન્વહમ્ ॥ ૧॥

નમસ્યન્તિ નરાઃ સર્વે શીર્ષેણ ભક્તિભાસુરાઃ ।
પાપસ્તોમમપાકર્તું તં પાર્શ્વં નૌમિ સર્વદમ્ ॥ ૨॥

યથાર્થવાદિના યેનોન્મૂલિતાઃ ક્લેશપાદપાઃ ।
તેનાનુભૂયતે ઋદ્ધિધીમતા સૂક્ષ્મદર્શિના ॥ ૩॥

શમ્ભવે પાર્શ્વનાથાય શ્રીમતે પરમાત્મને ।
નમઃ શ્રીવર્દ્ધમાનાય વિશ્વવ્યાધિહરાય વૈ ॥ ૪॥

દર્વીકરઃ શુભધ્યાનાદ્ધરણેન્દ્રમવાપ સઃ ।
યસ્માત્ પરમતત્ત્વજ્ઞાત્ સુપાર્શ્વાલ્લોકલોચનાત્ ॥ ૫॥

પ્રતિપૂર્ણં ધ્રુવં જ્ઞાનં નિરાવરણમુત્તમમ્ ।
વિદ્યતે યસ્ય પાર્શ્વસ્ય નિખિલાર્થાવભાસકમ્ ॥ ૬॥

યસ્મિનતીન્દ્રિયે સૌખ્યમનન્તં વર્તતે ખલુ ।
સ શ્રદ્ધેયઃ સ ચારાધ્યો ધ્યેયઃ સૈવ નિરન્તરમ્ ॥ ૭॥

સપ્તવિભક્તીનાં શ્લોકાઃ ।
તવ સ્તોત્રેણ કુર્વે સ્વાં જિહ્વાં દોષશતાકુલામ્ ।
પૂતામિદં ભવારણ્યે જન્તૂતાં જન્મનઃ ફલમ્ ॥ ૮॥

વરદાય નમસ્તુભ્યં નમઃ ક્ષીણાષ્ટકર્મણે ।
સારદાય નમસ્તુભ્યં નમોઽભીષ્ટાર્થદાયિને ॥ ૯॥

શઙ્કરાય નમસ્તુભ્યં નમો યથાર્થદર્શિને ।

વિપદ્ધર્ત્રે નમસ્તુભ્યં નમો વિશ્વાર્ત્તિહારિણે ॥ ૧૦॥

ધર્મમૂર્ત્તે નમસ્તુભ્યં જગદાનન્દદાયિને ।
જગદ્ભર્ત્રે નમસ્તેઽપિ નમઃ સકલદર્શિને ॥ ૧૧॥

સર્વજ્ઞાય નમસ્તુભ્યં નમો બન્ધુરતેજસે ।
શ્રીકરાય નમસ્તુભ્યમનન્તજ્ઞાનિને નમઃ ॥ ૧૨॥

નાથ ! ત્વચ્ચરણામ્ભોજસેવારસિકતત્પરાઃ ।
વિલસન્તિ શ્રિયં ભવ્યાઃ સદોદયા મહીતલે ॥ ૧૩॥

ઇન્દ્રા અપિ ગુણાન્ વક્તું પારં યસ્ય યયુર્નહિ ।
અસઙ્ખ્યેયાનનલ્પાશ્ચ ક્ષમસ્તર્હિ કથં નરઃ ॥ ૧૪॥

તથાપિ જ્ઞાનમુગ્ધોઽહં ભક્તિપ્રેરિતમાનસઃ ।
નામ્નામષ્ટસહસ્રેણ ત્વાં સ્તુવે સૌખ્યદાયકમ્ ॥ ૧૫॥

ઇતિ શ્રીપાર્શ્વનાથનામાવલ્યાં સ્તુતિપ્રસ્તાવના ॥

અથ સહસ્રનામસ્તોત્રમ્ ॥

અર્હન્ ક્ષમાધરઃ સ્વામી ક્ષાન્તિમાન્ ક્ષાન્તિરક્ષકઃ ।
અરિઞ્જયઃ ક્ષમાધારઃ શુભંયુરચલસ્થિતિઃ ॥ ૧॥

લાભકર્તા ભયત્રાતા ચ્છદ્માપેતો જિનોત્તમઃ ।
લક્ષ્મણો નિશ્ચલોઽજન્મા દેવેન્દ્રો દેવસેવિતઃ ॥ ૨॥

ધર્મનાથો મનોજ્ઞાઙ્ગો ધર્મિષ્ટો ધર્મદેશકઃ ।
ધર્મરાજઃ પરાતજ્ઞો ધર્મજ્ઞો ધર્મતીર્થકૃત્ ॥ ૩॥

સદ્ધેર્યાલ્પિતહંસાદ્રિસ્તત્રભવાન્ નરોત્તમઃ ।
ધાર્મિકો ધર્મધૌરેયો ધૃતિમાન્ ધર્મનાયકઃ ॥ ૪॥

ધર્મપાલઃ ક્ષમાસદ્મા(દ્મ) ધર્મસારથિરીશ્વરઃ ।
ધર્માધ્યક્ષો નરાધીશો ધર્માત્મા ધર્મદાયકઃ ॥ ૫॥

ધર્મવાન્ ધર્મસેનાનીરચિન્ત્યો ધીરધીરજઃ ।
ધર્મઘોષઃ પ્રકાશાત્મા ધર્મી ધર્મપ્રરૂપકઃ ॥ ૬॥

બહુશ્રુતો બહુબુદ્ધિર્ધર્માર્થી ધર્મવિજ્જિનઃ ।
દેવઃ સનાતનોઽસઙ્ગોઽનલ્પકાન્તિર્મનોહરઃ ॥ ૭॥

શ્રીમાન્ પાપહરો નાથોઽનીશ્વરોઽબન્ધનોઽરજાઃ ।
અચિન્ત્યાત્માઽનઘો વીરોઽપુનર્ભવો ભવોજ્ઝિતઃ ॥ ૮॥

સ્વયમ્ભૂઃ શઙ્કરો ભૂષ્ણુરનુત્તરો જિનોત્તમઃ ।
વૃષભઃ સૌખ્યદોઽસ્વપ્નોઽનન્તજ્ઞાની નરાર્ચિતઃ ॥ ૯॥

આત્મજ્ઞો વિશ્વવિદ્ ભવ્યોઽનન્તદર્શી જિનાધિપઃ ।
વિશ્વવ્યાપી જગત્પાલો વિક્રમી વીર્યવાન્ પરઃ ॥ ૧૦॥

વિશ્વબન્ધુરમેયાત્મા વિશ્વેશ્વરો જગત્પતિઃ ।
વિશ્વેનો વિશ્વપો વિદ્વાન્ વિશ્વનાથો વિભુઃ પ્રભુઃ ॥ ૧૧॥

અર્હત્ શતમ્ ॥ ૧૦૦॥

વીતરાગઃ પ્રશાન્તારિરજરો વિશ્વનાયકઃ ।
વિશ્વાદ્ભુતો નિઃસપત્નો વિકાશી વિશ્વવિશ્રુતઃ ॥ ૧॥

વિરક્તો વિબુધૈઃ સેવ્યો વૈરઙ્ગિકો વિરાગવાન્ ।
પ્રતીક્ષ્યો વિમલો ધીરો વિશ્વેશો વીતમત્સરઃ ॥ ૨॥

વિકસ્વરો જનશ્રેષ્ઠોઽરિષ્ટતાતિઃ શિવઙ્કરઃ ।
વિશ્વદૃશ્વા સદાભાવી વિશ્વગો વિશદાશયઃ ॥ ૩॥

વિશિષ્ટો વિશ્વવિખ્યાતો વિચક્ષણો વિશારદઃ ।
વિપક્ષવર્જિતોઽકામો વિશ્વેડ્ વિશ્વૈકવત્સલઃ ॥ ૪॥

વિજયી જનતાબન્ધુર્વિદ્યાદાતા સદોદયઃ ।
શાન્તિદઃ શાસ્ત્રવિચ્છમ્ભુઃ શાન્તો દાન્તો જિતેન્દ્રિયઃ ॥ ૫॥

વર્દ્ધમાનો ગતાતઙ્કને વિનાયકોજ્ઝિતોઽક્ષરઃ ।
અલક્ષ્યોઽભીષ્ટદોઽકોપોઽનન્તજિત્ વદતાં વરઃ ॥ ૬॥

વિમુક્તો વિશદોઽમૂર્તો વિજ્ઞો વિશાલ અક્ષયઃ ।
અમૂર્તાત્માઽવ્યયો ધીમાન્ તત્ત્વજ્ઞો ગતકલ્મુષઃ ॥ ૭॥

શાન્તાત્મા શાશ્વતો નિત્યસ્ત્રિકાલજ્ઞાસ્ત્રિકાલવિત્ ।
ત્રૈલોક્યપૂજિતોઽવ્યક્તો વ્યક્તવાક્યો વિદાં વરઃ ॥ ૮॥

સર્વજ્ઞઃ સત્યવાક્ સિદ્ધઃ સોમમૂર્તિઃ પ્રકાશકૃત્ ।
સિદ્ધાત્મા સર્વદેવેશોઽજય્યોઽમેયર્દ્ધિરસ્મરઃ ॥ ૯॥

ક્ષમાયુક્તઃ ક્ષમાચઞ્ચુઃ ક્ષમી સાક્ષી પુરાતનઃ ।
પરમાત્મા પરત્રાતા પુરાણઃ પરમદ્યુતિઃ ॥ ૧૦॥

પવિત્રઃ પરમાનન્દઃ પૂતવાક્ પરમેશ્વરઃ ।
પૂતોઽજેયઃ પરઞ્જ્યોતિરનીહો વરદોઽરહાઃ ॥ ૧૧॥

વીતરાગશતમ્ ॥ ૨૦૦॥

તીર્થઙ્કરસ્તતશ્લોકસ્તીર્થેશસ્તીર્થમણ્ડનઃ ।
તત્ત્વમૂર્ત્તિસઙ્ખ્યેયસ્તીર્થકૃત્ તીર્થનાયકઃ ॥ ૧॥

વીતદમ્ભઃ પ્રસન્નાત્મા તારકસ્તીર્થલોચનઃ ।
તીર્થેન્દ્રસ્ત્વાગવાન્ ત્યાગી તત્ત્વવિત્ ત્યક્તસંસૂતિઃ ॥ ૨॥

તમોહર્તા જિતદ્વેષસ્તીર્થાધીશો જગત્પ્રિયઃ ।
તીર્થપસ્તીર્ણસંસારસ્તાપહૃત્ તારલોચનઃ ॥ ૩॥

તત્ત્વાત્મા જ્ઞાનવિત્ શ્રેષ્ઠો જગન્નાથો જગદ્વિભુઃ ।
જગજ્જૈત્રો જગત્કર્તા જગજ્જ્યેષ્ઠો જગદ્ગુરુઃ ॥ ૪॥

જગદ્ધ્યેયો જગદ્વન્દ્યો જ્યોતિમા(ષ્મા) ) ન્ જગતઃ પતિઃ ॥ ૫॥

જિતમોહો જિતાનઙ્ગો જિતનિદ્રો જિતક્ષયઃ ।
જિતવૈરો જિતક્લેશો જગદ્ગ્રૈવેયકઃ શિવઃ ॥ ૬॥

જનપાલો જિતક્રોધો જનસ્વામી જનેશિતા ।
જગત્ત્રયમનોહારી જગદાનન્દદાયકઃ ॥ ૭॥

જિતમાનો જિતાઽઽકલ્પો જનેશો જગદગ્રગઃ ।
જગત્બન્ધુર્જગત્સ્વામી જનેડ્ જગત્પિતામહઃ ॥ ૮॥

જિષ્ણુર્જયી જગદ્રક્ષો વિશ્વદર્શી જિતામયઃ ।
જિતલોભો જિતસ્નેહો જગચ્ચન્દ્રો જગદ્રવિઃ ॥ ૯॥

નૃમનોજવસઃ શક્તો જિનેન્દ્રો જનતારકઃ ।
અલઙ્કરિષ્ણુરદ્વેષ્યો જગત્ત્રયવિશેષકઃ ॥ ૧૦॥

જનરક્ષાકરઃ કર્તા જગચ્ચૂડામણિર્વરઃ ।
જયાયાન્ જિતયથાજાતો જાડ્યાપહો જગત્પ્રભુઃ ॥ ૧૧॥

જન્તુસૌખ્યકરો જન્મજરામરણવર્જિતઃ ।

જન્તુસેવ્યો જગદ્વ્યાપ્તો જ્વલત્તેજા અકલ્કનઃ ॥ ૧૨॥

જિતસર્વો જનાધારસ્તીર્થરાટ્ તીર્થદેશકઃ ।
નરપૂજ્યો નરમાન્યો લડાનલઘનાઘનઃ ॥ ૧૩॥

તીર્થશતમ્ ॥ ૩૦૦॥

દેવદેવઃ સ્થિરઃ સ્થાસ્નુઃ સ્થેષ્ટઃ સ્થેયો દયાપરઃ ।
સ્થાવરો દાનવાન્ દાતા દયાયુક્તો દયાનિધિઃ ॥ ૧॥

દમિતારિર્દયાધામા દયાલુર્દાનતત્પરઃ ।
સ્થવિષ્ટો જનતાધારઃ સ્થવીયાન્ દેવતલ્લજઃ ॥ ૨॥

સ્થેયાન્ સૂક્ષ્મવિચારજ્ઞો દુઃસ્થહર્તા દયાચણઃ ।
દયાગર્ભો દયાપૂતો દેવાર્ચ્યો દેવસત્તમઃ ॥ ૩॥

દીપ્તો દાનપ્રદો દિવ્યો દુન્દુભિધ્વનિરુત્તમઃ ।
દિવ્યભાષાપતિશ્ચારુર્દમી દેવમતલ્લિકઃ ॥ ૪॥

દાન્તાત્મા દેવસેવ્યોઽપિ દિવ્યમૂર્તિર્દયાધ્વજઃ ।
દક્ષો દયાકરઃ કમ્રો દાનાલ્પિતસુરદ્રુમઃ ॥ ૫॥

દુઃખહરો દયાચચ્ચુર્દલિતોત્કટકલ્મુષઃ ।
દૃઢધર્મા દૃઢાચારો દૃઢવ્રતો દમેશ્વરઃ ॥ ૬॥

દૃઢશીલો દૃઢપુણ્યો દૃ(દ્ર) ઢીયત્ દમિતેન્દ્રિયઃ
દૃઢક્રિયો દૃઢધૈર્યો દાક્ષિણ્યો દૃઢસંયમઃ ॥ ૭॥

દેવપ્રષ્ટો દયાશ્રેષ્ઠો વ્યતીતાશેષબન્ધનઃ ।
શરણ્યો દાનશૌણ્ડીરો દારિદ્ર્યચ્છેદકઃ સુધીઃ ॥ ૮॥

દયાધ્યક્ષો દુરાધર્ષો ધર્મદાયકતત્પરઃ ।
ધન્યઃ પુણ્યમયઃ કાન્તો ધર્માધિકરણી સહઃ ॥ ૯॥

નિઃકલઙ્કો નિરાધારો નિર્મલો નિર્મલાશયઃ ।
નિરામયો નિરાતઙ્ગો નિર્જરો નિર્જરાર્ચિતઃ ॥ ૧૦॥

નિરાશંસો નિરાકાઙ્ક્ષો નિર્વિઘ્નો ભીતિવર્જિતઃ ।
નિરામો નિર્મમઃ સૌમ્યો નિરઞ્જનો નિરુત્તરઃ ॥ ૧૧॥

નિર્ગ્રન્થો નિઃક્રિયઃ સત્યો નિસ્સઙ્ગો નિર્ભયોઽચલઃ ।

નિર્વિકલ્પો નિરસ્તાંહો નિરાબાધો નિરાશ્રવઃ ॥ ૧૨॥

દેવશતમ્ ॥ ૪૦૦॥

આત્મભૂઃ શમ્ભવો વિષ્ણુઃ કેશવઃ સ્થવિરોઽચ્યુતઃ ।
પરમેષ્ઠી વિધિર્ધાતા શ્રીપતિર્નાગલ(લા) ચ્છનઃ ॥ ૧॥

શતધૃતિઃ શતાનન્દઃ શ્રીવત્સોઽધોક્ષજો હરિઃ ।
વિશ્વમ્ભરો હરિસ્વામી સર્પેશો વિષ્ટરશ્રવાઃ ॥ ૨॥

સુરજ્યેષ્ઠશ્ચતુર્વક્ત્રો ગોવિન્દઃ પુરુષોત્તમઃ ।
અષ્ટકર્ણશ્ચતુરાસ્યશ્ચતુર્ભુજઃ સ્વભૂઃ કવિઃ ॥ ૩॥

સાત્ત્વિકઃ કમનો વેધાસ્ત્રિવિક્રમો કુમોદકઃ ।
લક્ષ્મીવાન્ શ્રીધરઃ સ્રષ્ટા લબ્ધવર્ણઃ પ્રજાપતિઃ ॥ ૪॥

ધ્રુવઃ સૂરિરવિજ્ઞેયઃ કારુણ્યોઽમિતશાસનઃ ।
દોષજ્ઞઃ કુશલોઽભિજ્ઞઃ સુકૃતી મિત્રવત્સલઃ ॥ ૫॥

પ્રવીણો નિપુણો બુદ્ધો વિદગ્ધઃ પ્રતિભાન્વિતઃ ।
જનાનન્દકરઃ શ્રાન્તઃ પ્રાજ્ઞો વૈજ્ઞાનિકઃ પટુઃ ॥ ૬॥

ધર્મચક્રી કૃતી વ્યક્તો હૃદયાલુર્વદાવદઃ ।
વાચોયુક્તિપટુર્વક્તા વાગીશઃ પૂતશાસનઃ ॥ ૭॥

વેદિતા પરમઃ પૂજ્યઃ પરબ્રહ્મપ્રદેશકઃ ।
પ્રશમાત્મા પરાદિત્યઃ પ્રશાન્તઃ પ્રશમાકરઃ ॥ ૮॥

ધનીશ્વરો યથાકામી સ્ફારધીર્નિરવગ્રહઃ ।
સ્વતન્ત્રઃ સ્ફારશૃઙ્ગારઃ પદ્મેશઃ સ્ફારભૂષણઃ ॥ ૯॥

સ્ફારનેત્રઃ સદાતૃપ્તઃ સ્ફારમૂર્તિઃ પ્રિયંવદઃ ।
આત્મદર્શી સદાવન્દ્યો બલિષ્ટો બોધિદાયકઃ ॥ ૧૦॥

બુદ્ધાત્મા ભાગ્યસંયુક્તો ભયોજ્ઝિતો ભવાન્તકઃ ।
ભૂતનાથો ભયાતીતો બોધિદો ભવપારગઃ ॥ ૧૧॥

આત્મશતમ્ ॥ ૫૦૦॥

મહાદેવો મહાસાધુર્મહાન્ ભુનીન્દ્રસેવિતઃ ।
મહાકીર્તિર્મહાશક્તિમહાવીર્યો મહાયતિઃ ॥ ૧॥

મહાવ્રતો મહારાજો મહામિત્રો મહામતિઃ ।
મહેશ્વરો મહાભિક્ષુર્મુનીન્દ્રો ભાગ્યભાક્ શમી ॥ ૨॥

મહાધૃતિર્મહાકાન્તિર્મહાતપા મહાપ્રભુઃ ।
મહાગુણો મહાશ્વીલો મહાજિનો મહાપતિઃ ॥ ૩॥

મહામહા મહાશ્લોકો મહાબુદ્ધિર્મહોદયઃ ।
મહાનન્દો મહાધીરો મહાનાથો મહાબલઃ ॥ ૪॥

મહાવીરો મહાધર્મા મહાનેતા મહાયશાઃ ।
મહાસૂનુર્મહાસ્વામી મહેશઃ પરમોદયઃ ॥ ૫॥

મહાક્ષમો મહાભાગ્યો મહોદર્કો મહાશયઃ ।
મહાપ્રાજ્ઞો મહાચેતા મહાપ્રભો મહેશિતા ॥ ૬॥

મહાસત્ત્વો મહાશતે મહાશાસ્રો મહર્દ્ધિકઃ ।
મહાબોધિર્મહાધીશો મહામિશ્રો મહાક્રિયઃ ॥ ૭॥

મહાબન્ધુર્મહાયોગી મહાત્મા મહસામ્પતિઃ ।
મહાલબ્ધિર્મહાપુણ્યો મહાવાક્યો મહાદ્યુતિઃ ॥ ૮॥

મહાલક્ષ્યીર્મહાચારો મહાજ્યોતિર્મહાશ્રુતઃ ।
મહામના મહામૂર્ત્તિર્મહેભ્યઃ સુન્દરો વશી ॥ ૯॥

મહાશીલો મહાવિદ્યો મહાપ્તો હિ મહાવિભુઃ ।
મહાજ્ઞાનો મહાધ્યાનો મહોદ્યમો મહોત્તમઃ ॥ ૧૦॥

મહાસૌખ્યો મહાધ્યેયો મહાગતિર્મહાનરઃ ।
મહાતોષો મહાધૈર્યો મહેન્દ્રો મહિમાલયઃ ॥ ૧૧॥

મહાસુહૃન્મહાસખ્યો મહાતનુર્મહાધિભૂઃ ।
યોગાત્મા યોગવિત્ યોગી શાસ્તા યમી યમાન્તકૃત્ ॥ ૧૨॥

મહાશતમ્ ॥ ૬૦૦॥

હર્ષદઃ પુણ્યદસ્તુષ્ટઃ સન્તોષી સુમતિઃ પતિઃ ।
સહિષ્ણુઃ પુષ્ટ(ષ્ટિ) દઃ પુષ્ટઃ સર્વંસહઃ સદાભવઃ ॥ ૧॥

સર્વકારણિકઃ શિષ્ટો લગ્નકઃ સારદોઽમલઃ ।
હતકર્મા હતવ્યાધિર્હતાત્તિર્હતદુર્ગતિઃ ॥ ૨॥

પુણ્યવાન્ મિત્રયુર્મેધ્યઃ પ્રતિભૂર્ધર્મમન્દિરઃ ।
યશસ્વી સુભગઃ શુભ્રસ્ત્રિગુપ્તો હતદુર્ભગઃ ॥ ૩॥

હૃષીકેશોઽપ્રતર્ક્યાત્માઽનન્તદૃષ્ટિરતીન્દ્રિયઃ ।
શિવતાતિરચિન્ત્યર્દ્ધિરલેપો મોક્ષદાયકઃ ॥ ૪॥

હતદુઃખો હતાનઙ્ગો હતક્લેશકદમ્બકઃ।
સંયમી સુખરોઽદ્વિષ્ટઃ પરાદ્ધ્યર્યો હતપાતકઃ ॥ ૫॥

શેભુખીશઃ સુપ્રસન્નઃ ક્ષેમઙ્કુરો દયાલયઃ ।
સ્તવનાર્હો વિરાગાર્હસ્તપસ્વી હર્ષસંયુતઃ ॥ ૬॥

અચલાત્માઽખિલજ્યોતિઃ શાન્તિમાનરિમર્દનઃ ।
અરિઘ્નોઽપુનરાવૃત્તિરરિહર્તાઽરિભઞ્જકઃ ॥ ૭॥

અરોષણોઽપ્રમેયાત્માઽધ્યાત્મગમ્યો યતીશ્વરઃ ।
અનાધારો યમોપેતઃ પ્રભાસ્વરઃ સ્વયમ્પ્રભઃ ॥ ૮॥

અર્ચિતો રતિમાનાપ્તો રમાકરો રમાપ્રદઃ ।
અનીર્ષ્યાલુરશોકોઽગ્ર્યોઽવધભિન્નવિશ્વરઃ ॥ ૯॥

અનિઘ્નોઽકિઞ્ચનઃ સ્તુત્યઃ સજ્જનોપાસિતક્રમઃ ।
અવ્યાબાધઃ પ્રભૂતાત્મા પારગતઃ સ્તુતીશ્વરઃ ॥ ૧૦॥

યોગિનાથઃ સદામોદઃ સદાધ્યેયોઽભિવાદકઃ ।
સદામિશ્રઃ સદાહર્ષઃ સદાસૌખ્યઃ સદાશિવઃ ॥ ૧૧॥

હર્ષશતમ્ ॥ ૭૦૦॥

જ્ઞાનગર્ભો ગણશ્રેષ્ઠો જ્ઞાનયુક્તો ગુણાકરઃ ।
જ્ઞાનચઞ્ચુર્ગતસ્તેશો ગુણવાન્ ગુણસાગરઃ ॥ ૧॥

જ્ઞાનદો જ્ઞાનવિખ્યાતો જ્ઞાનાત્મા ગૂઢગોચરઃ ।
જ્ઞાનસિદ્ધિકરો જ્ઞાની જ્ઞાનજ્ઞો જ્ઞાનનાયકઃ ॥ ૨॥

જ્ઞાનાઽમિત્રહરો ગોપ્તા ગૂઢાત્મા જ્ઞાનભૂષિતઃ ।
જ્ઞાનતત્ત્વો ગુણગ્રામો ગતશત્રુર્ગતાતુરઃ ॥ ૩॥

જ્ઞાનોત્તમો ગતાશઙ્કો ગમ્ભીરો ગુણમન્દિરઃ ।
જ્ઞાતજ્ઞેયો ગદાપેતો જ્ઞાનત્રિતયસાધકઃ ॥ ૪॥

જ્ઞાનાબ્ધિઃ ગીર્પતિઃ સ્વસ્થો જ્ઞાનભાક્ જ્ઞાનસર્વગઃ ।
જ્ઞાતગોત્રો ગતશોચ્યઃ સદ્ગુણરત્નરોહણઃ ॥ ૫॥

જ્ઞાનોત્કૃષ્ટો ગતદ્વેષો ગરિષ્ઠગીઃ ગિરાં પતિઃ ।
ગણાગ્રણીર્ગુણજ્યેષ્ઠો ગરીયાન્ ગુણમનોહરઃ ॥ ૬॥

ગુણજ્ઞો જ્ઞાતવૃત્તાન્તો ગુરુર્જ્ઞાનપ્રકાશકઃ ।
વિશ્વચર્ચ્યુર્ગતાકલ્પો ગરિષ્ઠો ગુણપેટકઃ ॥ ૭॥

ગમ્ભીરધીર્ગુણાધારો ગુણખાનિર્ગુણાલયઃ ।
જ્ઞાતાભિધો ગતાકાઙ્ક્ષો જ્ઞાનપતિર્ગતસ્તુહઃ ॥ ૮॥

ગુણી જ્ઞાતરહઃકર્મા ક્ષેમી જ્ઞાનવિચક્ષણઃ ।
ગણેશો જ્ઞાતસિદ્ધાન્તો ગતકષ્ટો ગભીરવાક્ ॥ ૯॥

ગતગત્યાગતિર્ગુણ્યો ગીર્વાણવાક્ પુરોગમઃ ।
ગીર્વાણેન્દ્રો ગતગ્લાસ્નુર્ગતમોહો દરોજ્ઝિતઃ ॥ ૧૦॥

ગીર્વાણપૂજિતો વન્ધ્યોऽન(નિ) ન્ધ્યો ગીર્વાણસેવિતઃ ।
સ્વેદજ્ઞો ગતસંસારો ગીર્વાણરાટ્ પુરઃસરઃ ॥ ૧૧॥

ઘાતિકર્મવિનિર્મુક્તો ખેદહર્તા ઘનધ્વનિઃ ।
ઘનયોગો ઘનજ્ઞાનો ઘનદો ઘનરાગહૃત્ ॥ ૧૨॥

ઉત્તમાત્મા ગતાબાધો ઘનબોધસમન્વિતઃ ।
ઘનધર્મા ઘનશ્રેયો ગીર્વાણેન્દ્રશિરોમણિઃ ॥ ૧૩॥

જ્ઞાનશતમ્ ॥ ૮૦૦॥

ઐશ્વર્યમણ્ડિતઃ કૃષ્ણો મુમુક્ષુર્લોકનાયકઃ ।
લોકેશઃ પુણ્ડરીકાક્ષો લોકેડ્ લોકપુરન્દરઃ ॥ ૧॥

લોકાર્કો લોકરાટ્ સાર્વો લોકેશો લોકવલ્લભઃ ।
લોકજ્ઞો લોકમન્દારો લોકેન્દ્રો લોકકુઞ્જરઃ ॥ ૨॥

લોકાર્ચ્યો લોકશૌણ્ડીરો લોકવિલ્લોકસંસ્તુતઃ ।
લોકેનો લોકધૌરેયો લોકાગ્ર્યો લોકરક્ષકઃ ॥ ૩॥

લોકાનન્દપ્રદઃ સ્થાણુઃ શ્રમણો લોકપાલકઃ ।
ઐશ્વર્યશોભિતો બભ્રુઃ શ્રીકણ્ઠો લોકપૂજિતઃ ॥ ૪॥

અમૃતાત્મોત્તમાધ્યાન ઈશાનો લોકસેવિતઃ ।
ઐશ્વર્યકારકો લોકવિખ્યાતો લોકધારકઃ ॥ ૫॥

મૃત્યુઞ્જયો નરધ્યેયો લોકબન્ધુર્નરેશિતા ।
લોકચન્દ્રો નરાધારો લોકચક્ષુરનીશ્વરઃ ॥ ૬॥

લોકપ્રેષ્ઠો નરવ્યાઘ્રો લોકસિંહો નરાધિભૂઃ ।
લોકનાગો નરખ્યાતો લોભભિલ્લોકવત્સલઃ ॥ ૭॥

વામદેવો નરજ્યાયાન્ લોકભર્તા નરાગ્રગઃ ।
લોકવિભુર્નરદૃશ્વા લોકપો લોકભાસ્કરઃ ॥ ૮॥

લોકદર્શી નરજ્યેષ્ઠો લોકવન્દ્યો નરાધિપઃ ।
લોકશાસ્તા નરવ્યાધિહર્તા લોકવિભાવકઃ ॥ ૯॥

સુમેધા લોકબર્હિષ્ટઃ સત્યાશીર્લોકવન્દિતઃ ।
ઋદ્ધિકર્તા નરસ્વામી ઋદ્ધિમાન્ લોકદેશકઃ ॥ ૧૦॥

પ્રમાણં પ્રણવઃ કામ્ય ઇ(ઈ) શિતોત્તમસંવરઃ ।
ઇભ્ય ઉત્તમસંવેગ ઇન ઉત્તમપૂરુષઃ ॥ ૧૧॥

સ્તુત્યા(ત્ય) ર્હ ઉત્તમાસેવ્યોઽદભ્રતેજા અહીશ્વરઃ ।
ઉત્તમાખ્યઃ સુગુપ્તાત્મા મન્તા તજ્ઞઃ પરિવૃઢઃ ॥ ૧૨॥

લોલુપઘ્નો નિરસ્તૈનાઃ સુવ્રતો વ્રતપાલકઃ ।
અશ્વસેનકુલાધારો નીલવર્ણવિરાજિતઃ ॥ ૧૩॥

ઐશ્વર્યશતમ્ ॥ ૯૦૦॥

કલ્યાણભાગ્ ભુનિશ્રેષ્ઠશ્ચતુર્ધા મર્ત્યસેવિતઃ ।
કામ્યદઃ કર્મશત્રુઘ્નઃ કલ્યાણાત્મા કલાધરઃ ॥ ૧॥

કર્મઠઃ કેવલી કર્મકાષ્ટાગ્નિઃ કરુણાપરઃ ।
ચક્ષુષ્યશ્ચતુરઃ કર્મમુક્તઃ કલ્યાણમન્દિરઃ ॥ ૨॥

ક્રિયાદક્ષ ક્રિયાનિષ્ઠઃ ક્રિયાવાન્ કામિતપ્રદઃ ।
કૃપાચણઃ કૃપાચઞ્ચુઃ કીર્તિદઃ કપટોજ્ઝિતઃ ॥ ૩॥

ચન્દ્રપ્રભઃ છલોચ્છેદી ચન્દ્રોપાસિતપત્કજઃ ।
ક્રિયાપરઃ કૃપાગારઃ કૃપાલુઃ કેશદુર્ગતઃ ॥ ૪॥

કારણં ભદ્રકૂપારઃ કલાવિત્ કુમતાન્તકૃત્ ।
મદ્રપૂર્ણઃ કૃતાન્તજ્ઞઃ કૃતકૃત્યઃ કૃપાપરઃ ॥ ૫॥

કૃતજ્ઞઃ કમલાદાતા કૃતાન્તાર્થપ્રરૂપકઃ ।
ભદ્રમૂર્તિઃ કૃપાસિન્ધુઃ કામઘટઃ કૃતક્રિયઃ ॥ ૬॥

કામહા શોચનાતીતઃ કૃતાર્થઃ કમલાકરઃ ।
ચારુમૂર્તિશ્ચિદાનન્દશ્ચિન્તામણિશ્ચિરન્તનઃ ॥ ૭॥

ચિદાનન્દમયશ્ચિન્તાવર્જિતો લોભતર્જિતઃ ।
કર્મહા બન્ધમોક્ષજ્ઞઃ કૃપાવાન્ કાન્તિકારકઃ ॥ ૮॥

કજનેત્રો નરત્રાતા કૃતપુણ્યઃ કૃતાન્તવિત્ ।
લોકાગ્રણીવિ(ર્વિ) રોધઘ્નઃ કીર્તિમાન્ ખગસેવિતઃ ॥ ૯॥

અયાચિતો મહોત્સાહશ્ચિદૂપશ્ચિન્મયો વૃતિઃ ।
ભદ્રયુક્તઃ સ્વયમ્બુદ્ધોઽનલ્પબુદ્ધિર્દમેશિતા ॥ ૧૦॥

વિશ્વકર્મા કલાદક્ષઃ કલ્પવૃક્ષઃ કલાનિધિઃ ।
લોભતિરસ્કૃતઃ સૂક્ષ્મો લોભહૃત્ કૃતલક્ષણઃ ॥ ૧૧॥

લોકોત્તમો જનાધીશો લોકધાતા કૃપાલયઃ ।
સૂક્ષ્મદર્શ્યેન્દુનીલાભો લોકાવતંસકઃ ક્ષમઃ ॥ ૧૨॥

શિષ્ટેષ્ટોઽપ્રતિભઃ શાન્તિશ્છત્રત્રયવિભૂષિતઃ ।
ચામીકરાસનારૂઢઃ શ્રીશઃ કલ્યાણશાસનઃ ॥ ૧૩॥

કર્મણ્યોઽત્રભવાન્ ભદ્રઃ શાન્તિકરઃ પ્રજાહિતઃ ।
ભવ્યમાનવકોટીરો મુક્તિજાનિઃ શ્રિયાન્નિધિઃ ॥ ૧૪॥

કલ્યાણશતમ્ ॥ ૧૦૦૦॥ ૭ ॥

અમૂનિ તવ નામાનિ પઠન્તિ યે નરોત્તમાઃ ।
ભવેયુઃ સમ્પદસ્તેષાં સિદ્ધયશ્ચાપિ મઞ્જુલાઃ ॥ ૧॥

સ્વામિન્ ! જિહવાસહસ્રોઽપિ વઞ્ચુ શક્તો ન તે ગુણાન્ ।
સહસ્રાક્ષો ન તે રૂપશ્રિયં નિરીક્ષિતું ક્ષમઃ ॥ ૨॥

ત્વચ્ચેતસિ પ્રવર્તેઽહમિત્યુદન્તો હિ દુર્લભઃ ।
મચ્ચિત્તે વિધસે ત્વં ચેત્ દેવેનાન્યેન પૂર્યતામ્ ॥ ૩॥

હર્ષબાષ્પજલૈર્ભવ્યૈર્મન્નેત્રે ત્વન્મુખાશ્રિતે ।
અન્યપ્રેક્ષણસમ્ભૂતં ક્ષાલય(યે) તાં મલં નિજમ્ ॥ ૪॥

ત્વદ્વક્ત્રસઙ્ગિની નેત્રે ત્વત્પરીષ્ટિકરૌ કરૌ ।
ત્વદ્ગુણગ્રાહકે શ્રોત્રે ભૂયાસ્તાં મે મુદા સદા ॥ ૫॥

ઋદ્ધિત્વં હિ પ્રભુત્વં વા મનોવાઞ્છિતમન્વહમ્ ।
સૌભાગ્યત્વં નૃપત્વં વૈ લભેરન્ તવ ભક્તિતઃ ॥ ૬॥

ત્વમસિ નાથ! ભવાર્ણવનાવિકસ્ત્વમસિ સૌખ્યકદમ્બકકારકઃ ।
ત્વમસિ સિદ્ધિવધૂસ્તનનાયકસ્ત્વમસિ સપ્તનયાર્થવિચક્ષણઃ ॥ ૭॥

ત્વમસિ દુઃખનિવારણતત્પરસ્ત્વમસિ મુક્તિવશારતિહર્ષિતઃ ।
ત્વમસિ ભવ્યકુશેશયભાસ્કરસ્ત્વમસિ દેવનરાધિપસેવિતઃ ॥ ૮॥

ત્વમસિ મોહમતઙ્ગજકેશરી ત્વમસિ નાથ! જગજ્જનવત્સલઃ ।
ત્વમસિ દુઃકૃતમન્મથશઙ્કરસ્ત્વમસિ કોપશિલોચ્ચયમુદ્ગરઃ ॥ ૯॥

ભૃત્યોઽસ્મિ તવ દાસોઽહં વિનયી તેઽસ્મિ કિઙ્કરઃ ।
નાથ! ત્વચ્ચરણાધારો લભે શં ભવદાશ્રિતઃ ॥ ૧૦॥

જયન્તુ તે શ્રીગુરુધર્મમૂર્તયો ગણાધિરાજા મુનિસઙ્ઘપાલકાઃ ।
અનેકવાદીશ્વરવાદસિન્દુરાભિમાનપઞ્ચાસ્યનિભાઃ ક્રિયાપરાઃ ॥ ૧૧॥

શ્રીધર્મમૃર્તિસૂરીશાઃ સૂરિશ્રેણિવતંસકાઃ ।
કલ્યાણવપુષો નૂનં ચિરં નન્દન્તુ સત્તમાઃ ॥ ૧૨॥

તદંહ્રિકજરોલમ્બઃ શિષ્યઃ કલ્યાણસાગરઃ ।
ચકાર પાર્શ્વનાથસ્ય નામાવલીમભીષ્ટદામ્ ॥ ૧૩॥

પુણ્યરૂપમિદં સ્તોત્રં નિત્યમધ્યેતિ ભાક્તિકઃ ।
તસ્ય ધામ્નિ મહાલક્ષ્યીરેધતે સૌખ્યદાયકા ॥ ૧૪॥

ઇતિ શ્રીપાર્શ્વનાથનામાન્યષ્ટોત્તરસહસ્રમિતાનિ સમાપ્તાન્યજનિષત ॥

શ્રીવિધિપક્ષગચ્છાધિરાજ શ્રીધર્મમૂર્તિસૂરીશ્વરપત્કજભ્રમરાયમાનેન
શ્રીકલ્યાણસાગરસૂરિણા શ્રીપાર્શ્વનાથનામાનિ
શ્રીમન્માર્તણ્ડપુરે કૃતાનિ લિખિતાનિ ચ ॥

નિજકર્મક્ષયાર્થમ્ ॥ કૌશીધં વિહાય ચ સમ્પૂર્ણાનિ પાઠિતાનીતિ ॥ ૭ ॥

Proofread by DPD

*pArshvanAthasahasranAmastotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*